International Journal of Sanskrit Research
अनन्ता

ISSN: 2394-7519
IJSR 2017; 3(4): 26-31
© 2017 IJSR
www.anantaajournal.com
Received: 07-05-2017
Accepted: 08-06-2017

**Amritava Das**
Belur Ramakrishna Mission Vidyamandira, Calcutta University, West Bengal, India

**Correspondence**
**Amritava Das**
Belur Ramakrishna Mission Vidyamandira, Calcutta University, West Bengal, India

# संस्कृतकाव्येषु वनस्पतिरामणीयकम्

**Amritava Das**

अस्ति तावत् संस्कृतकाव्यानां वनस्पतिसमाश्रितम् अनतिसाधारणं किमपि वैशिष्ट्यमिति नास्त्यविदितं संस्कृतसाहित्यरसास्वादितां सहृदयानां विदुषाम्। "सौन्दर्यमलंकारः" इत्येवंवादिन एव न अपि तु 'काव्यस्यात्मा ध्वनिः' 'वाक्यं रसात्मकं काव्यम्' तथा "रमणीयार्थप्रतिपादकः शव्दः काव्यम्" इत्यादिना प्रकारेण काव्यं पारिभाषयन् काव्यात्मतत्त्वज्ञा आचार्या अपि नास्वीकुर्वन्ति कमलकेतककुरवदीनां ताम्वुलवल्लीपरिणद्धपूगादीनाञ्च रसाध्याकत्वं काव्यश्रियोऽङ्गप्रत्यङ्गविन्यासविधानकविश्लेषणप्रसङ्गेषु।ऋगवेदस्य अरण्यानीसूक्तं भवतु वाल्मीकिरामाणयस्य 'अरण्यकाण्डम्' भवतु। महाभारतस्य 'अनुशासनपर्व', उपणिषदाम् 'आख्यनानि' वा सन्तु। सर्वत्र दृश्यते पादपैः सह प्राणधारिणां सहावस्थानं पारस्परिकं परिष्वजनं पारस्परिकम् उपजीवितं च। अतः कथं व्यवसिता स्यात् काऽपि शकुन्तला पादपानां सेचनात् पूर्वं जलपानाय ? कथं वा न पाययेत पयः भगवती गौरी पुत्रीकृतं कमपि देवदारुम् ?

नास्ति कश्चन विवादः पादपानां प्राणधारिणां च स्वारस्ये तथापि नैकाः जिज्ञासाः पादपप्रकारादिषु विषयेषु वहोकालात् पुर्वमपि जनमानसेषु येषां समाधानाय विश्लेषनाय वा प्रयतितं चरकशुश्रुतप्रभृतिराचार्यैः आयुर्वेदाधारभूतेषु स्वीयग्रन्थेषु उपक्रमितं च प्रशस्त पादसदृश्यैस्तत्त्वविदभिः वैशेषिकदर्शनाख्यायकेषु पदार्थधर्मसंग्रहसदृशेषु, वैशेषिकभाव्येषु।

पादपाणां वर्गीकरणम् -

आकारस्य उदभवस्य च दृष्ट्या विभिन्नेषु शास्त्रेषु यथा आयुर्वेदे, वैशेषिकदर्शने तथा अमरकोषे प्रभृतिषु नैकेषु ग्रन्थेषु पादपानां वर्गीकरणं दृश्यते।

**क) चरकसुश्रुतानुसारं पादपवर्गाः**

1) वनस्पतयः 2) वनस्पत्या 3) औषधयः 4) वीरुधः

**ख) वैशेषिकाणामनुसारं पादपवर्गाः**

1) तृणानि 2) औषधयः 3) लताः 4) अवतानाः 5) वृक्षाः 6) वनस्पतयः

**ग) अमरकोषानुसारं पादपवर्गाः**

1) वृक्षाः 2) क्षूपाः 3) लताः 4) औषधयः 5) तृणानि 6) द्रुमाः

गतानुगतिकरूपेण प्रचलितावधारणासमाश्रयणप्रवणलोकव्यवहारानुरमपि पादपानां वर्गाःप्रायः पञ्चपल्लवत्वेन वृक्षपञ्चत्वेन च भारतस्य विभिन्नेषु क्षेत्रेषु देवपूजनमाश्रित्य किञ्चित्वैषम्य पूर्वकं प्रथिताः सन्ति, तेषु केषाञ्चन उल्लेखो वर्तते सुप्रसिद्धेषु ग्रन्थेषु अपि केषाञ्चन च तु केवलं जनश्रुतिषु -

**क) पञ्चैते देवतरवो मन्दारः परिजातकः**

सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम्।

**ख) पञ्चक्षीरिणो वृक्षाः**

न्यग्रोधोदूम्वराश्वत्थपारीषप्लक्षपादपाः, पञ्चैते क्षीरिणो वृक्षास्तेषां त्वक् पञ्चवल्कलम्।

**ग) पञ्चपल्लवाः**

१) आम्रः २) जम्वुः ३) कपित्थः ४) वटः ५) विल्वः

**घ) पञ्चपुष्पानि**

१) चम्पा २) आम्रः ३) शमी ४) कमलम् ५) करवीरः

**ङ) कामस्य वाणपञ्चकम्**

१) अरविन्दः २) अशोकः ३) आम्रः ४) नवमल्लिका ५) नीलोत्पलम्

एभिः वहुभिः प्रकारैः पादपानां वर्गीकरणं दृश्यते।

**पादोपोत्पादकानां वनोपवनोद्यानादीनां स्वरूपम्**

संस्कृतसाहित्ये समुपवर्णितानां वनोपवनोद्यानादीनां संख्या विस्तृतास्ति। स्वतोद्भवस्य तथा जनसमाजेन उत्पादनस्य दृष्ट्या पादपोदभवस्थलानामपि नैकधा वर्गीकरणं कर्त्तुं शक्यते। तद्वथा -

१) अरण्याणी (वानप्रस्थिनिवासपरकं सुविशालं वनम्)

२) वनम् (यथा खाण्डववनम्, कुरुजाङ्गलम्, कुमारवनम्)

३) अरण्यम् (यथा नैमिषारण्यम्, दण्डकारण्यम्)

४) नागरोद्यानम् (यथा पुष्पकरण्डकोदयानम्) - मृच्छकटिके, मदनोद्यानम् - मालतीमाधवे)

५) तपोवनवाटिका (यथा कण्वाश्रमवाटिका)

६) प्रमदवनम् गृहोद्यानम् वा - राजमहीषाणां कृते निर्मितम् उद्यानं प्रसादानां नातिदूरे संवर्धितम्)

उपरिनिर्दिष्टानां पादपप्ररोहक्षेत्राणां मध्ये सर्वाधिकरूपेण प्राय प्रमदवनानि संस्कृतकाव्येषु विशेषतश्च नाटकेषु चर्चितानि सन्ति)।

कालिदासेन मालविकाग्निमित्रे तथा अभिज्ञानशकुन्तले प्रमदवनानामुल्लेखः कृतः। प्रमदवनेषु प्रायः चत्वारः खण्डाः भवन्ति स्म। तत्र वृक्षाः क्षूपाः लताश्च वृक्षखण्डे, हरितखण्डे फलखण्डे, माल्यखण्डे यथायथं स्वीयस्वीयवर्गेषु समारोप्यन्ते स्म।

**संस्कृतसाहित्ये चर्चिताः प्रमुखाः वनस्पतयः**

आदिकविः वाल्मीकिः न केवलं लौकिकसंस्कृतसाहित्यस्य प्रवर्तकः अपि तु लौकिकभारतीयपादपानां प्रथमः निर्देष्टा परिज्ञाता तथा परिगणयिता अपि आसीदिति सुष्पष्टं भवति रामायणस्य अवलोकनात्।

वाल्मीकिना गोदावरीतटवर्तिनः पम्पासरसमीपस्थाऋष्यमूकपर्वतस्थाः तथा प्रश्रवणगिरिवर्तिनो ये तेषां नामकीर्तनमपि अस्माकं श्रेयसे स्यादिति कृत्वा तेषां

परिगणनमात्रमप्यत्रौचित्याय न स्यात् इति निर्दिशामि तान् अधोलिखितरूपेण -
अपराजिता, अर्कः(मन्दारः) तितिण्डी, खर्जुरः, शमी, शिरीषम्, कुन्दः इङ्गुदी, करवीरः, - (अभिज्ञानशकुन्तलम्), अर्जुनः -(ऋतुसंहारम्), आमलकी,चम्पकम्,,पाटला - (नैषधीयचरितम्), आम्रः, केतकी, तालः, जपा, निचुलः, जम्वुः, वाणीरः (वेतस्) - (मेघदूतम् पूर्वमेघः),, कदम्वः, कपित्थः, गुग्गुलुः, वकुलः,वदरीः,वन्धुकः,विल्वः, शाल्मली - (हनुमन्नाटकम्), कुरवकः - (मेघदूतम् उत्तरमेघः), कुङ्कुमम् - (मृच्छकटिकम्, रत्नावली), कुटजः, लशुनः (मालतीमाधवम्), कुष्माण्डः,जीरकः,नीवारः,पनसः,कण्टकिफलम् - (मृच्छकटिकम्), कोविदारः - "इक्षाकुवंशीयानां राज्ञां ध्वजचिह्णम्" - (उत्तररामचरितम्), तमालः - (मृच्छकटिकम्), पलाण्डुः, मुखदूषकः - (अनर्घराघवम्),

**प्रमूखसंस्कृतकाव्येषु निरूपितं पादपान्तस्तत्वम्**

रामायणमहाभारतप्रभृतीतिहासपूराणानाम् अतिरिक्तं संस्कृतस्य सुविशालं वाङ्मयं वर्तते। गौतमवुद्धस्य जन्मकालादारभ्य अद्यावधि यानि ऐतिहासिकानि तथ्यानि व्य्वहारिकरूपेण वैज्ञानिकपद्धत्या च परीक्षणीयानि सन्ति तानी अनुसृत्य स्थूलतया संस्कृतकाव्यस्य त्रयः प्रमुखाः कालाः निर्धारयितुं शक्यन्ते तद्यथा -
१) प्राचीनकालः (६०० पूर्वख्रिष्टीय शती पर्यन्तम्)
२) मध्यकालः (१३ ख्रिष्टीय शतीतः १६ ख्रिष्टीय शती पर्यन्तम्)
३) अर्वाचीनकालः (२० ख्रिष्टीय शतीतः अद्यपर्यन्तम्)

एतेषु सर्वेषु कालेषु संस्कृते नैकानी काव्यानि, नाटकानि च विरचितानि वहुभिः सुविख्यातैः कविभिः। पूर्वोल्लिखितयाः सूच्च्याः माध्यमेन एतदवधारयितुं शकयते यत् पादपैः सह काव्यस्य अविनाभावत्वं वर्तते। एवम्प्रकारेण यद्यपि अस्मिन् सन्दर्भे सर्वाणि काव्यानि अवधेयानि सन्ति तथापि स्थानाभाववशात् अत्र कालिदास-भारवि-माघ-श्रीहर्षै निर्मितानि काव्यान्याश्रित्यैव एतेषां प्रमूखकवीनां पादपतत्त्वविषयिण्य काश्चन धारणाः स्थालीपुलाकवत् अत्र सन्दर्भन्त्ये -

**१) कालिदासनिर्दिष्टं पादपान्तस्तत्त्वम् -** कालिदासः स्वीयऋतुसंहारे, मेघदूते, रघुवंशे च प्रायः समस्तभारतीयपादपानाम् अवस्थितिम् आकारप्रकारं तथा सौष्ठवमेव न अपितु तेषु अन्तर्निहितं सत्यं, शिवं, सुन्दरमपि निरूपयति,अतएव कविगणनाप्रसङ्गेषु पादपतत्त्वानुभूतेः दृष्ट्याणि कालिदासस्य कनिष्ठिकाधिष्ठिततत्त्वं सिध्यति। कालिदासः कथयति यत् पादपेषु मानवीयता, शिवत्वं तथा अर्थत्वमपि भवति, अन्यैरनेकैः सद्गुनैः सह। उदाहरणतया -
पादपाः मानववद् व्यवहरति, मानवच्च ते सम्भावनीयाः भवन्ति सहृदयजनैः अर्थात् पादपेषु देवत्वाधिष्ठिता मानवता वर्तते। तद्यथा -

> "अमुं पुरः पश्यसि देवदारुं ? पुत्रीकृतोऽसौ वृषभध्वजेन
> यो हेम-कुम्भ-स्तननिःसृतानां स्कन्दस्य मातुः पयसां रसज्ञः (रघुवंसम् २ सर्गः ३६ श्लोकः)

विवाहसद्दशाणि पवित्रवनद्धनान्यपि नैकेष्ववसरेषु समीहितपादपपौषकल्यानुसारणि भवन्ति। प्रकारान्तरेण जीवनमूलकम् अस्ति। तत्र च पादपानां महती भूमिका वर्तते अर्थात् पादपाः अर्थव्यवस्थायाः स्रोतस्वरूपाः सन्तीति निदर्शयति कविकुलगुरुः सुनन्दायाः वचनेषु

> "ताम्वूलवल्ली-परिणद्ध-
> पूगास्वेलालतालिङ्गित-चन्दनासु
> तमाल-पत्रास्तरणासु रन्तुं प्रसीद शश्वन्मलय-
> स्थलीषु"। (रघुवंशम् ६ सर्गः ६४ श्लोकः)

प्रमदाजनेन शरीरशोभार्थं संधार्यमाणानि विविधानि पुष्पाणि सौन्दर्यवर्धकानि भवन्ति, इति तु सर्वैरेव कविभिर्निर्दिष्टम् किन्तु कलिदासेन शरीरावयवानामनुरूपं पादपसत्यस्य मानवीयसौन्दर्येण सह तथा मानवीयसत्यस्य पादपीयसौन्दर्येण सह पारस्परिकः समन्वयः कृतः। तद्यथा -

"हस्ते लीलाकमलमलके वालकुन्दानुविद्धं
नीता लोध्रप्रसवरजसा पाण्डुतामानने श्रीः
चूड़ापाशे नवकूरबकं चारुकर्णे शिरीषम्
सीमन्ते च त्वदुपगमजं यत्र नीपं वधूनाम्
"(मेघदूतम्, उत्तरमेघः, २ श्लोकः)

प्रकारान्तरेण कालिदासस्यैतत् कथनं सौन्दर्यस्य पादपोत्पादितप्रसाधनेषु प्रयोगौचित्यं वर्तितव्यम् इति संदिशति। एतादृशीमेव भावनां परिपोषयति ऋतुसंहारस्यैतत् पद्यमपि -

"कर्णेषु योग्यं नवकर्णिकारं चलेषु नीलेष्वलकेष्वशोकम्
पुष्पञ्च फुल्लं नवमल्लिकायाः
प्रयाति कान्तिं प्रमदाजनस्य" (ऋतुसंहारम् ६ सर्गः ५ श्लोकः)

**२) भारविनिर्दिष्टपादपान्तस्तत्वम्**

भारविः स्वीये 'कीरातार्जुनीयम्' इत्याख्ये महाकाव्ये व्यासस्य निर्देशानुसारं तपसा भगवन्तं भूतभावनं शङ्करं प्रीणयित्वा पाशुपतास्त्रमधिगन्तुं द्वैतवनात् हिमालयस्थं इन्द्रकीलपर्वतं अर्युनस्य यात्रामार्गमनुसृत्य तत्प्रसङ्गेन हिमालयीयपादपान् अनुवर्णनयन् तेषाम् अनितरसाधारणं वैशिष्ट्यं प्रति समादरम् औत्सुक्यञ्च सामाजिकानां हृदयेषु समुत्पादयति। भारवेः पादपवर्णने सन्ति नैकानि वैशिष्ट्यानि तथापि विस्तरभयात् तेष्वत्र केवलं द्वित्राणामेव समुल्लेखः क्रियते।

क) हिमालये नैका औषधयः दीपवत् प्रकाशं विकिरन्ति अतः हिमालयस्य नैकेषु पादपेषु दीप्तिमत्वम् वर्तते।
तद्यथा विवृणोति भारविरस्मिन् पद्ये
"श्रीमल्लता भवनमौषधयः प्रदीपाः शय्या नवानि हरिचन्दनपल्लवानि
अस्मिन् रतिश्रमनुदश्च सरोजवाताः स्मर्तुं दिशन्ति न दिवः सुरसुन्दरीभ्यः (किरातार्जुनीयम् ५,२८)

ख) भारविना नैकेषां हिमालयीयपादपानामेतद् वैशिष्ट्यमपि समुद्घटितं यत् तेषां पत्राणि परिणितानि न भवन्ति। तद्यथा -
रम्या नवद्युतिमपैति न शाद्वलेभ्यः
श्याभी भवन्तनुदिनं नलिनी वनानि
अस्मिन् विचित्र कुसुमस्तवकाचितानां शाखाभृतं परिणमन्ति न पल्लवानि। (कीरातार्जुनीयम् ५, ३७)

ग) भारविः हिमालयीयपादपानां परागस्य कनकमयातपत्रलक्ष्मीत्वं परिभाव्य पर्यावरणपरिशोधत्वमपि संकेतयति तद्यथा -
उत्फुल्लस्थलनलिनीवनादमुष्मादुद्धूतः सरसिजसम्भवः परागः
वात्याभिर्वियति विवर्तितः समन्तादाधत्ते कनकमयातपत्रलक्ष्मीम्" (कीरातार्जुनीयम् ५, ३९)

**३) माघनिर्दिष्टं पादपान्तस्तत्वम्**

महाकविः माघः शिशुपालवधमहाकाव्यस्य षष्ठसर्गे ऋतुवर्णनप्रसङ्गेन रैवतकगिरौ समुपलभ्यमानानां वनस्पतीनां चित्रणं करोति। सेनानिवेशानन्तरं रैवतके गिरौ रिरंसुं हरिं निषेवितुं सर्वेऽपि ऋतुगणः युगपदेव स्व-स्वनियतवनस्पतीनां सश्रीकतायाः माध्यमेन तत्र समुपास्थोऽभूत। तदवसरे माघेन पादपानामन्तस्तत्वमित्थं समुद्घाटितम् -

क) वृक्षाः जीवधारिण इव नार्तितुं क्षमाः - तद्यथा
विगतरागगुणोऽपि जनो न कश्चलति वाति पयोदनभस्वति।

अभिहितेऽलिभिरेवमिवोच्चकैरननृते ननृते नवपल्लवैः ॥ शिशुपालवधम् ६ सर्गः.३९ श्लोकः ॥
अस्यामाशयो यत् वृक्षेषु नृत्यक्षमता वर्तते इति।

ख) वृक्षेषु पुंस्तं भवति न वा ?
अस्य प्रश्नस्य संकेतः माघेन कृतः। अस्योत्तरमपि तेन निषेधात्मकरूपेण निदर्शितम्। तद्यथा -

''समभिसृत्य रसादवलम्बितः प्रमदया कुसुमावचिचीर्षया
अविनमन्न रराजवृथोच्चकैरनृतया वनपादपः''
(शिशुपालवधम् ६ सर्गः, १० श्लोकः)

यद्यपि कविमयप्रसिद्धिः पादपानां पुंस्तं वर्तते, तथापि सम्भवतः माघस्य एषः भावः अस्ति यद् कविसमयप्रसिद्धिरविश्वसनीया वर्तते। यतः अङ्गनानां पादाघातादिभिः सम्प्रति अशोकेषु विकासो न दृश्यते अपरञ्च माघेनात्र वनपादपस्य उल्लेखः कृतः न तु विलासकाननीयस्य कस्यचन पादपस्य।

ग) पादपानां स्पृहणीयता प्राणिनां स्वभावानुसारं भिद्यते उदाहरणतया क्रमेलकः निम्वपत्राणि प्रेम्ना भक्षयति। किन्तु निम्वपत्रेषु यदि अकस्मात् किञ्चित् आम्रपत्रं मिश्रितं स्यात् तर्हि ग्रासमेव निर्गिरति, तद्यथा

"सार्धं कथञ्चिदुचितैः पिचुमर्दपत्त्रैरास्यान्तरालगतमाम्रदलं म्रदीयः।
दासेरकःसपदि संवलितं निषादैर्विप्रं पुरा पतगराडिव निर्जगार ॥ शिशुपालवधम् ५ सर्गः. ६६ श्लोकः ॥

**४) श्रीहर्षनिर्दिष्टं पादपान्तस्तत्वम्**

श्रीहर्षः स्वीये नैषधीयचरिते नलदमयन्तौः प्रणयगाथायाः अङ्गत्वेन, तत्रापि प्रमुखतः नलस्य विरहपीड़ापनयन प्रसङ्गेन, केतक-दाड़िम-पलाश-लता-चम्पक-स्थलपद्मिनी-चाम्पेय-नागकेसर-मालुरफल-पाटला-अगस्त्यवृक्ष-अशोकादीनां पादपादीनां उल्लेखं करोति। नैषधीयचरितस्य प्रथमे सर्गे भैमीरूपगुणश्रवणोद्भुताभिलाषजन्यवेदनापनेतुमेव नलो विलासकानने गछति। अतः अत्र नलेन ये पादपाः दृष्टाः तेषु तदानीं विरहावस्थानुरूपं तैक्ष्ण्यं तेनानुभूतम्। एतदेव कारणं यत् येषु पादपेषु कालिदासः प्रायः सौम्यं पश्यति। तेष्वापि प्रायः श्रीहर्षेण तैक्ष्ण्यं निर्दिष्टम्। तद्यथा -

"अशोकमर्थान्वितनामताशया गतान् शरण्यं गृहशोचिनोऽध्वगान्।
अमन्यता पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम्।।
(नैषधीयचरितम्, १ सर्गः, १०१ श्लोकः)

पादपवर्णने हास्यरसस्यानुविधानं कुर्वन् श्रीहर्षः पादपानां तपः शीलत्वमपि सङ्केतयति। तद्यथा-

"विदर्भसुभ्रूस्तनतूंङ्गताप्तये घटानिवापश्यदलं तपस्यतः।
फलानि धूमस्य धयानधोमुखान् स दाडिमे दोहधूपिनि द्रुमे।। (नैषधीयचरितम्, १ सर्गः, ८२ श्लोकः)

उच्चपदस्य प्राप्त्यर्थं किं किं न करणीयम् भवतीत्यपि संदिशत्यत्र श्रीहर्षः। केषाञ्चन पुष्पानां (वृक्षाणां) देवपूजानामर्हत्वमपि श्रीहर्षेण सङ्केतितम्। तद्यथा-

"विनिद्रपत्रालिगतालिकैतवान्
मृगाङ्कचूड़ामणिवर्जनार्जितम्।
दधानमाशासु चरिष्ञु दुर्यशः स कौतुकी तत्र ददर्श कैतकम्।। (नैषधीयचरितम् १सर्गः,७८ श्लोकः)

**वनस्पतीनां पर्यावरणसंशुद्धिपरकं जगत्संरक्षणपरकञ्च महत्त्वम् :**

संस्कृतकाव्येषु वनस्पतेयः सत्यस्य शिवस्य तथा सुन्दरस्य दृश्यमानाः मूर्तयः निरूपिताः प्रायः सर्वैरेव कविभिः। पादपानां व्रह्मत्वम् आत्मारूपत्वं देवत्वं जगत्सरक्षकत्त्वञ्च सम्यक स्फुटीभवति संस्कृतकाव्येषु। ध्यातव्यानि सत्यस्मिन् सन्दर्भे कानिचन शाश्वतसत्यसमानि अधोनिर्दिष्टानि कथनानि।

**क) पादपानां व्रह्मरूपत्वं आत्मरूपत्वं देवरूपत्वं**

"ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्।
छन्दांसि यस्य पर्णानि यस्तुं वेद स वेदविद्"।। (श्रीमद्भगवद्गीता, १५ अध्यायः,१ श्लोकः)

**ख) वृक्षारोपणस्यैहिकसुखसमृद्धिदायकत्वं**

"आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव वृक्षोऽथ बिल्वः।
तस्य फलानि तपसानुदन्तु मायान्तरायाश्च बाह्याः अलक्ष्मीः ॥ (श्रीसूक्तम् ६ श्लोकः)

**ग) वृक्षाणां दायादवत्त्वं वृक्षारोपणस्य पूण्यजनकत्त्वञ्च**

"मानवं पुत्रवद् वृक्षास्तरायन्ति परत्र च।
पुत्रवत् परिपाल्यास्ते पुत्रास्ते धर्मतः स्मृताः।। (महाभारतम् अनुशासनपर्व - ५,८,३०)

एवं पकारेण संस्कृतकाव्येषु वनस्पतीनां यन्निरूपणं वर्तते। तदद्यापि अवधेयम्स्ति।

**References**


1. Raghuvansam, Kalidas, Editon – Sri Vidyabhusan Rajendranath, Basumati sahitya vidyamandir, Kolkata 1336
2. Ratnavali, Sri Harsha deva, KALE M.R., ed- motilal banarasidas, 2011.
3. Ritusamhar, kalidas, Editon – Sri Vidyabhusan Rajendranath, Basumati sahitya vidyamandir, Kolkata 1336.
4. Kumarsambhabam, kalidas, Editon – Sri Vidyabhusan Rajendranath, Basumati sahitya vidyamandir, Kolkata 1336.
5. Naisadhcharitam,edition -dr, Das devkumar, samskrit pustak bhandar, 2006, Kolkata-700006
6. Kiratarjuniyam, edition –sri tripathi jadupati, B.N publication, 2010, Kolkata, 700073
7. Shishupalvadham, edition- Das devkumar, samskrit pustak bhandar, 2013, Kolkata-700006
8. Srimadbhagabatgita –edition- Gita Press, Gorakhpur, 2014.
9. Mahabharat –edition, Basu Rajsekhar, M.C sarkar and sons private limited, 1418 (Bengali calendar), Kolkata-700073